॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ६८

विज्ञाय तु मनस्तस्य राघवस्य महात्मनः ।
संनिवृत्याहवात्तस्मात्प्रविवेश पुरं ततः ॥ १॥

सोऽनुस्मृत्य वधं तेषां राक्षसानां तरस्विनाम् ।
क्रोधताम्रेक्षणः शूरो निर्जगाम महाद्युतिः ॥ २॥

स पश्चिमेन द्वारेण निर्ययौ राक्षसैर्वृतः ।
इन्द्रजित्तु महावीर्यः पौलस्त्यो देवकण्टकः ॥ ३॥

इन्द्रजित्तु ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ।
रणायाभ्युद्यतौ वीरौ मायां प्रादुष्करोत्तदा ॥ ४॥

इन्द्रजित्तु रथे स्थाप्य सीतां मायामयीं तदा ।
बलेन महतावृत्य तस्या वधमरोचयत् ॥ ५॥

मोहनार्थं तु सर्वेषां बुद्धिं कृत्वा सुदुर्मतिः ।
हन्तुं सीतां व्यवसितो वानराभिमुखो ययौ ॥ ६॥

तं दृष्ट्वा त्वभिनिर्यान्तं नगर्याः काननौकसः ।
उत्पेतुरभिसङ्क्रुद्धाः शिलाहस्ता युयुत्सवः ॥ ७॥

हनूमान्पुरतस्तेषां जगाम कपिकुञ्जरः ।
प्रगृह्य सुमहच्छृङ्गं पर्वतस्य दुरासदम् ॥ ८॥

स ददर्श हतानन्दां सीताम् इन्द्रजितो रथे ।
एकवेणीधरां दीनामुपवासकृशाननाम् ॥ ९॥

परिक्लिष्टैकवसनाममृजां राघवप्रियाम् ।
रजोमलाभ्यामालिप्तैः सर्वगात्रैर्वरस्त्रियम् ॥ १०॥

तां निरीक्ष्य मुहूर्तं तु मैथिलीम् अध्यवस्य च ।
बाष्पपर्याकुलमुखो हनूमान्व्यथितोऽभवत् ॥ ११॥

अब्रवीत्तां तु शोकार्तां निरानन्दां तपस्विनाम् ।
दृष्ट्वा रथे स्थितां सीतां राक्षसेन्द्रसुताश्रिताम् ॥ १२॥

किं समर्थितमस्येति चिन्तयन्स महाकपिः ।
सह तैर्वानरश्रेष्ठैरभ्यधावत रावणिम् ॥ १३॥

तद्वानरबलं दृष्ट्वा रावणिः क्रोधमूर्छितः ।
कृत्वा विशोकं निस्त्रिंशं मूर्ध्नि सीतां परामृशत् ॥ १४॥

तं स्त्रियं पश्यतां तेषां ताडयामास रावणिः ।
क्रोशन्तीं राम रामेति मायया योजितां रथे ॥ १५॥

गृहीतमूर्धजां दृष्ट्वा हनूमान्दैन्यमागतः ।
दुःखजं वारिनेत्राभ्यामुत्सृजन्मारुतात्मजः ।
अब्रवीत्परुषं वाक्यं क्रोधाद्रक्षोऽधिपात्मजम् ॥ १६॥

दुरात्मन्नात्मनाशाय केशपक्षे परामृशः ।
ब्रह्मर्षीणां कुले जातो राक्षसीं योनिमाश्रितः ।
धिक्त्वां पापसमाचारं यस्य ते मतिरीदृशी ॥ १७॥

नृशंसानार्य दुर्वृत्त क्षुद्र पापपराक्रम ।
अनार्यस्येदृशं कर्म घृणा ते नास्ति निर्घृण ॥ १८॥

च्युता गृहाच्च राज्याच्च रामहस्ताच्च मैथिली ।
किं तवैषापराद्धा हि यदेनां हन्तुमिच्छसि ॥ १९॥

सीतां च हत्वा न चिरं जीविष्यसि कथं चन ।
वधार्हकर्मणानेन मम हस्तगतो ह्यसि ॥ २०॥

ये च स्त्रीघातिनां लोका लोकवध्यैश्च कुत्सिताः ।
इह जीवितमुत्सृज्य प्रेत्य तान्प्रतिलप्स्यसे ॥ २१॥

इति ब्रुवाणो हनुमान्सायुधैर्हरिभिर्वृतः ।
अभ्यधावत सङ्क्रुद्धो राक्षसेन्द्रसुतं प्रति ॥ २२॥

आपतन्तं महावीर्यं तदनीकं वनौकसाम् ।
रक्षसां भीमवेगानामनीकेन न्यवारयत् ॥ २३॥

स तां बाणसहस्रेण विक्षोभ्य हरिवाहिनीम् ।
हरिश्रेष्ठं हनूमन्तमिन्द्रजित्प्रत्युवाच ह ॥ २४॥

सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागताः ।

तां हनिष्यामि वैदेहीमद्यैव तव पश्यतः ॥ २५ ॥

इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर ।
सुग्रीवं च वधिष्यामि तं चानार्यं विभीषणम् ॥ २६ ॥

न हन्तव्याः स्त्रियश्चेति यद्ब्रवीषि प्लवङ्गम ।
पीडा करममित्राणां यत्स्यात्कर्तव्यमेव तत् ॥ २७ ॥

तमेवमुक्त्वा रुदतीं सीतां मायामयीं ततः ।
शितधारेण खड्गेन निजघानेन्द्रजित्स्वयम् ॥ २८ ॥

यज्ञोपवीतमार्गेण छिन्ना तेन तपस्विनी ।
सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शना ॥ २९ ॥

तामिन्द्रजित्स्त्रियं हत्वा हनूमन्तमुवाच ह ।
मया रामस्य पश्येमां कोपेन च निषूदिताम् ॥ ३० ॥

ततः खड्गेन महता हत्वा ताम् इन्द्रजित्स्वयम् ।
हृष्टः स रथमास्थाय विननाद महास्वनम् ॥ ३१ ॥

वानराः शुश्रुवुः शब्दमदूरे प्रत्यवस्थिताः ।
व्यादितास्यस्य नदतस्तदुर्गं संश्रितस्य तु ॥ ३२ ॥

तथा तु सीतां विनिहत्य दुर्मतिः
प्रहृष्टचेताः स बभूव रावणिः ।
तं हृष्टरूपं समुदीक्ष्य वानरा
विषण्णरूपाः समभिप्रदुद्रुवुः ॥ ३३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com